# श्रीछिन्नमस्तास्तोत्रम्

## shrIChinnamastAstotram

ईश्वर उवाच:
Ishvara uvAchaH

स्तवराजमहं वन्दे वैरोचन्याः शुभप्रदम् ।
stavarAjamahaM vande vairochanyAH shubhapradam |

नाभौ शुभ्रारविन्दन्तदुपरि विलसन्मण्डलञ्चण्डरश्मेः
nAbhau shubhrAravindantadupari vilasanmaNDala~nchaNDarashmeH

संसारस्येकसारान्त्रिभुवनजननीन्धर्मकामार्त्थदात्रीम् ।
saMsArasyekasArAntribhuvanajananIndharmakAmArtthadAtrIm |

तस्मिन्मध्ये त्रिभागे त्रितयतनुधराञ्छिन्नमस्ताम्प्रशस्तान्ताम्
tasminmadhye tribhAge tritayatanudharA~nChinnamastAmprashastAntA

व्वन्दे छिन्नमस्तां शमनभयहरां य्योगिनीय्योगमुद्राम् ॥ १ ॥
vvande ChinnamastAM shamanabhayaharAM yyoginIyyogamudrAm || 1 |

नाभु शुद्धसरोजवक्रविलसद्बन्धूकपुष्पारुणम्भा
nAbhu shuddhasarojavaktravilasadbandhUkapuShpAruNambhA

स्वद्भास्करमण्डलन्तदुदरे तद्योनिचक्रम्महत् ।
svadbhAskaramaNDalantadudare tadyonichakrammahat |

तन्मध्ये विपरीतमैथुनरतप्रद्युम्नसत्कामिनीपृष्ठस्-
tanmadhye viparItamaithunaratapradyumnasatkAminIpRRiShThas-

थान्तरुणार्ककोटिविलसत्तेजःस्वरूपाम्भजे ॥ २ ॥
thAntaruNArkakoTivilasattejaHsvarUpAmbhaje || 2 ||

वामे छिन्नशिरोधरान्तदितरे पाणौ महत्कर्तृकाम्
vAme ChinnashirodharAntaditare pANau mahatkartRRikAm

प्रत्यालीढपदान्दिगन्तवसनामुन्मुक्तकेशव्रजाम् ।
pratyAlIDhapadAndigantavasanAmunmuktakeshavrajAm |

छिन्नात्मीयशिरस्समुच्छलदसृग्धाराम्पिबन्तीम्पराम्
ChinnAtmIyashirassamuchChaladasRRigdhArAmpibantImparAm

बलादित्यसमप्र् आकाशविलसन्नेत्रत्रयोद्भासिनीम् ॥ ३ ॥
balAdityasamapr AkAshavilasannetratrayodbhAsinIm || 3 ||

वामादन्यत्र नालम्बहु गहनगलद्रक्तधाराभिरुच्चैर्
vAmAdanyatra nAlambahu gahanagaladraktadhArAbhiruchchair

गायन्तींमस्थिभूषाङ्करकमललसत्कर्त् र्कामुग्ररूपाम् ।
gAyarntImasthibhUShA~Nkarakamalalasatkart rkAmugrarUpAm |

रक्तामारक्तकेशीमपगतवसनां व्वर्णिनीमात्मशक्तिम्
raktAmAraktakeshImapagatavasanAM vvarNinImAtmashaktim

प्रत्यालीढोरुपादामरुणितनयनां य्योगिनीं योगनिद्राम् ॥ ४ ॥
pratyAlIDhorupAdAmaruNitanayanAM yyoginIM yoganidrAm || 4 ||

दिग्वस्त्राम्मुक्तकेशीम्प्रलयघनघटाघोररूपाम्प्रचण्डान्दंष्ट्रा
digvastrAmmuktakeshImpralayaghanaghaTAghorarUpAmprachaNDAnda

आदुः प्रेक्ष्य वक्त्रोदरविवरलसल्लोलजिह्वाग्रभासाम् ।
AduH prekShya vaktrodaravivaralasallolajihvAgrabhAsAm |

विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीम्भीममूर्त्तिं
vidyullolAkShiyugmAM hRRidayataTalasadbhoginImbhImamUrttiM

सद्यश्छिन्नात्मकण्ठप्रगलितरुधिरैर्डाकिनीं व्वर्द्धयन्तीम् ॥ ५ ॥
sadyashChinnAtmakaNThapragalitarudhirairDDAkinIM vvarddhayantIm

ब्रह्मेशानाच्युताद्यैः शिरसि विनिहिता मन्दपादारविन्दैर्
brahmeshAnAchyutAdyaiH shirasi vinihitA mandapAdAravindair

आप्तर्योगीन्द्रमुख्यैः प्रतिपदमनिशञ्चिन्तिताञ्चिन्त्यरूपाम् ।
AptaryogIndramukhyaiH pratipadamanisha~nchintitA~nchintyarUpAm

संसारे सारभूतान्त्रिभुवनजननीञ्छिन्नमस्ताम्प्रशस्ताम्
saMsAre sArabhUtAntribhuvanajananI~nChinnamastAmprashastAm

इष्टान्तामिष्टदात्रीङ्कलिकलुषहराञ्चेतसा चिन्तयामि ॥ ६ ॥
iShTAntAmiShTadAtrI~NkalikaluShaharA~nchetasA chintayAmi || 6 ||

उत्पत्तिस्थितिसंहृतीर्घटयितुन्धत्ते त्रिरूपान्तनुन्त्रै

utpattisthitisaMhRRitIrghaTayitundhatte trirUpAntanuntrai

गुण्याज्जगतो यदीयविकृतिर्ब्रह्माच्युतः शूलभृत् ।

guNyAjjagato yadIyavikRRitirbrahmAchyutaH shUlabhRRit |

तामाद्याम्प्रकृतिं स्मरामि मनसा सर्वार्त्थसंसिद्धये

tAmAdyAmprakRRitiM smarAmi manasA sarvArtthasaMsiddhaye

यस्याः स्मेरपदारविन्दयुगले लाभम्भजन्ते नराः ॥ ७ ॥

yasyAH smerapadAravindayugale lAbhambhajante narAH || 7 ||

अभिलषितपरस्त्रीयोगपूजापरोऽहम्

abhilaShitaparastrIyogapUjAparo.aham

बहुविधजनभावारम्भसम्भाविततोहम् ।

bahuvidhajanabhAvArambhasambhAvitatoham |

पशुजनविरतोऽहम्भैरवीसंस्थितोऽहम्

pashujanavirato.ahambhairavIsaMsthito.aham

ङ्गुरुचरणपरोऽहम्भैरवोऽहम् शिवोऽहम् ॥ ८ ॥

~NgurucharaNaparo.ahambhairavo.aham shivo.aham || 8 ||

इदं स्तोत्रम्महापुण्यम्ब्रह्मणा भाषितम्पुरा ।

idaM stotrammahApuNyambrahmaNA bhAShitampurA |

सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम् ॥ ९ ॥
sarvasiddhipradaM sAkShAnmahApAtakanAshanam || 9 ||

यः पठेत्प्रातरुत्थाय देव्यास्सन्निहितोऽपि वा ।
yaH paThetprAtarutthAya devyAssannihito.api vA |

तस्य सिद्धिर्भवेद्देवि वाञ्छितार्त्थप्रदायिनी ॥ १० ॥
tasya siddhirbbhaveddevi vA~nChitArtthapradAyinI || 10 ||

धनन्धान्यं सुतञ्जायां हयं हस्तिनमेव च ।
dhanandhAnyaM suta~njAyAM hayaM hastinameva cha |

वसुन्धराम्महाविद्यामष्टसिद्धि/ल्लभेद्ध्रुवम् ॥ ११ ॥
vasundharAmmahAvidyAmaShTasiddhi/llabheddhruvam || 11 ||

वैयाघ्राजिनरञ्जितस्वजघनेऽरण्ये प्रलम्बोदरे
vaiyAghrAjinara~njitasvajaghane.araNye pralambodare

खर्वेऽनिर्वचनीयपर्वसुभगे मुण्डावलीमण्डिते ।
kharve.anirvachanIyaparvasubhage muNDAvalImaNDite |

कर्त्रीङ्कुन्दरुचिं व्विचित्रवनिताञ्ज्ञाने दधाने पदे
kartrI~NkundaruchiM vvichitravanitA~nj~nAne dadhAne pade

मातर्भ्भक्तजनानुकम्पिनि महामायेऽस्तु तुभ्यन्नमः ॥ १२ ॥
mAtarbbhaktajanAnukampini mahAmAye.astu tubhyannamaH || 12 ||

इति श्रीछिन्नमस्तास्तोत्रं सम्पूर्णम्॥

iti sRIChinnamastAstotraM sampUrNam||